**प्रश्नः 121. मानस्वरस्य आदर्शस्वरस्य वा (Cardinal Vowels) सचित्रविवेचनं निरूपयत ।**

**उत्तरम्**–प्रो. डेनियल-जॉन्स-महोदयेन 'मानस्वरस्य' कल्पना कृता । इमे स्वराः कस्यापि भाषा-विशेषेन सम्बद्धाः न सन्ति; अपितु काल्पनिकाः सन्ति । अत एव इमे 'मानकस्वराः' आदर्श-स्वराः वा कथ्यन्ते भाषाविद्भिः । एतेषां व्यावहारिक-उपयोगिता इयमस्ति यद् अनेन साहाय्येन कस्यापिभाषा-विशेषस्य स्वराणाम् उच्चारण-प्रक्रियायाः सम्यक्-निर्धारणं कर्तुं शक्यते । पूर्णरूपेण कस्यामपि भाषायाम् इमे स्वराः नोपलभ्यन्ते; परन्तु आंशिकरूपेण सर्वासु भाषासु प्राप्यन्ते । एतेषां 'मान-स्वराणां' सचित्र-विवेचनम् अधो लिखितमस्ति–




सुस्पष्टमिदं यत् इ, ए, ऍ, अ ऽ इति चत्वारः अग्रस्वराः तथा उ, ओ, ओॅ, आ ऽऽ इति चत्वारः पश्चस्वराः सन्ति । एतेषु अष्टस्वरेषु इ, उ संवृतौ, ए, ओ अर्धसंवृतौ, ऍ, ओॅ अर्धविवृतौ, अ, आ इति विवृतौ स्तः ।

## 3.4. ध्वनि-परिवर्तकानि कारणानि (Causes of Phonetic Changes)

**प्रश्नः 122. ध्वनिपरिवर्तनस्य कति कारणानि भेदोपभेद-पुरस्सरं संक्षेपेण विवेचयत ।**

**उत्तरम्**–परिवर्तनशीलस्य मानवस्य भाषायामपि परिवर्तनं स्वाभाविकमेवास्ति । इदम् परिवर्तनमेव तस्याः भाषायाः परिवर्द्धनस्यापि कारणं भवति । परिवर्द्धनोऽयं तस्याः विकास इत्यभिधीयते । भाषाविषयकं परिवर्तनमिदम् अतीव शनैः-शनैः मन्दगत्या भवति; अतः कोऽपि एनं परिवर्तनं सहसा द्रष्टुं ज्ञातुं वा न शक्नोति । या प्राग्विभाषा भवति, सैव कालक्रमेण परिवर्तनमुद्गरेण ताड्यमाना भाषायाः स्थानं प्राप्नोति । यद्यपि भाषा सर्वथा स्वच्छंदा नहि भवति, अपितु नियमैः परम्पराभिश्च बद्धा भवति, तथापि कालक्रमेण प्राचीनासु परिस्कृतास्वपि भाषासु परिवर्तनमिदं तु भवत्येव; यतः भाषा, स्वाभाविकरूपेण स्वतः प्रवाहशीलाऽस्ति ।

इत्थं भाषायाः परिवर्तनशीलत्वात् तस्यां जायमानस्य परिवर्तनस्य प्रारम्भः ध्वनि-परिवर्तनादेव भवति; यद्यपि ध्वनिः, रूपम्, अर्थश्च भाषायाः त्रीणि प्रधानान्यंगानि सन्ति, एतेषु परिवर्तनपि भवत्येव; तथापि ध्वनिपरिवर्तनस्य ध्वनिविकारस्य वा अतीव वैशिष्ट्यपूर्णम् स्थानमस्ति । सर्वे जानन्त्येव यत् ध्वनेः सम्बन्धो देशेन कालेन व्यक्त्या च भवति । अतएव इमानि त्रीणि कारणानि एव ध्वनिविकारमुत्पादयन्ति । एतेषां समेषां कारणानां भागद्वये विभागः कर्तुं शक्यते,–(i) बाह्य-कारणम्, (ii) आभ्यन्तरकारणञ्च ।

1. **बाह्यकारणम्** (External Cause)–भौगोलिक-ऐतिहासिक - सांस्कृतिक - साहित्यिक - वैज्ञानिक - वैयक्तिकाख्याः षड्-संवर्गाः सन्ति ध्वनिपरिवर्तनस्य बाह्यकारकाणाम्, येषां सांकेतिकं विवरणम् अधोलिखितम् अस्ति–

(i) **भौगोलिककारणम्**–भौगोलिककारणान्यपि ध्वनि-परिवर्तनं प्रोत्साहयन्ति । केषाञ्चन भाषावैज्ञानिकानां देवेन्द्र-नाथशर्मादीनां मतमस्ति यत् जलवाय्वादिकानां भौगोलिक-कारकानां प्रभावः स्वरयन्त्रेऽप्यापतति । एतस्माद् कारणादेव भिन्नदेशीयाः जनाः भिन्न-भिन्न प्रकारेण शब्दोच्चारणे सामर्थ्यशीलाः भवन्ति । प्रयत्नबलेन परकीयाणां भाषाणामपि कोऽपि उच्चारणं कर्तुं शक्नोति, किन्तु तादृक् नैपुण्यं नैव अवाप्नोति यादृक् स्वकीयायाः भाषायाः उच्चारणे भवति; परन्तु कारकस्यास्य महत्त्वमत्यल्पमस्ति ।

(ii) **ऐतिहासिक-कारणम्**–कालक्रमेण ऐतिहासिक-प्रभावादपि ध्वनिविकारः भवत्येव । यथा वैदिक-कालाद् आरभ्य वर्तमानकाल-पर्यन्तं संस्कृत-वर्णानाम् उच्चारणे नैकविधं परिवर्तनं दरीदृश्यते । कस्यापि प्राचीनायाः भाषायाः तुलना यदा अर्वाचीनया भाषया समं क्रियते, तदा ज्ञायते यत् कालक्रमेण भाषायां कियत् परिवर्तनं सञ्जातम् । या प्राग्विभाषा आसीत् सैव सम्प्रति भाषायाः स्थाने प्रतिष्ठिताऽस्ति । इत्थं सुस्पष्टमिदं यत् प्राचीनासु संस्कृतादिषु परिष्कृताष्वपि भाषासु कालक्रमेण निरन्तरं परिवर्तनं भवत्येव ।

(iii) **सांस्कृतिक-कारणम्**–सांस्कृतिकाभ्युत्थानेन समं राजनैतिक-व्यापारिकसम्बन्धादिभिः अपि भाषायां परिवर्तनं भवत्यनिवार्यरूपेण । अर्थात्, सांस्कृतिकपुनर्जागरणस्य प्रभावाद् भाषाऽपि प्रभाविता भवति । यथा आंग्लसंस्कृति-संक्रमिते भारतवर्षेऽस्मिन् सर्वासु भाषासु न्यूनाधिकमॉग्लप्रभावं सर्वत्र द्रष्टुं शक्यते । सुस्पष्टमिदं यत् विजेता-देशस्य भाषायाः प्रभावः पराजित-देशस्य भाषायाम् अवश्यमेवावलोक्यते ।

(iv) **साहित्यिक-कारणम्**–ध्वनिपरिवर्तने साहित्यिक-कारकस्यापि महती भूमिका अस्ति । देवकीनन्दन-खत्री-महोदयस्य 'चन्द्रकान्ता' इत्युपन्यासस्य रसास्वादनाय लक्षाधिकाः जनाः हिन्दी-भाषायाः अध्ययनं कृतवन्तः । तुलसिदासेनवि-

Scanned with OKEN Scanner